# चीनदेशीयं ज्योतिषम्

**देवर्षिः अगस्त्यः**
**वरिष्ठानुसन्धाता**
**संस्कृत-संवर्धन-प्रतिष्ठानम्**

## सारांशः

भारतीयज्योतिषं चीनदेशीयज्योतिषं तथा च पाश्चात्यज्योतिषमिति त्रिविधस्य ज्योतिषस्य व्यवहारस्य आधिक्यम् आधुनिककाले अनुभूयते । ज्योतिषशास्त्रस्य प्रवर्तने अस्य शास्त्रस्य दैनन्दिनव्यवहारे उपयोगिता एव अस्ति । कारणं प्राणिमात्रस्य निखिलव्यवहारः कालाधीनो भवति । कारणं न केवलं मानवमात्रम् अपितु सर्वप्राणिनां व्यवहारः कालाधीनः भवति । एतेषु प्राणिषु केचन दिनचराः केचन च रात्रिचराः भवन्ति । अयं दिनरात्रिव्यवहारः किमपि कालमानमेव । केवलं भारते एव ज्योतिषस्य प्रसक्तिः इति सङ्गतां नैव उपैति । एतत् कथमिति लक्षणादेव बुध्यते । अतः "कालबोधकं शास्त्रं ज्योतिषमिति अभिधीयते" यदा अस्य शास्त्रस्य इयं परिभाषा स्वीक्रियते तदा समग्रेऽपि विश्वे अस्य सत्ता परिलक्ष्यते । संसारस्य अस्य व्यवहारः विभिन्नरूपैः भवति किन्तु भारतदेशे त्रिस्कन्धरूपेण पञ्चस्कन्धरूपेण अथवा सप्तस्कन्धरूपेण अस्य व्यापकता अतीव वर्तते । प्रस्तुतलेखे चीनदेशस्य ज्योतिषं कीदृशम् इत्येव अस्माकं ज्ञेयम् अस्ति । चीनदेशे राशिचक्रे द्वादश एव राशयः सन्ति किन्तु तेषां नामानि तु पृथक् सन्ति । भारतीये ज्योतिषे नवविधस्य कालमानस्य चर्चा अस्ति किन्तु चीनदेशे तु मात्रं चान्द्रमानस्यैव मान्यता अस्ति । सिद्धान्तभागः तथैव नास्ति यथा भारते अस्ति किन्तु फलितविभागः एतदपेक्षया अधिकः व्यापकः अस्ति । राशिस्वभावानुसारम् एव जातकस्य शुभाशुभत्वस्य विचारः क्रियते । राशीपाः न सन्ति किन्तु तत्त्वानि एव एतेषां नियामकाः भवन्ति ।

## भूमिका

प्राचीनज्योतिषपरम्परासु चीनदेशीयं ज्योतिषम् अपि अन्यतमम् अस्ति । चीनभारतदेशयोः काश्चन परम्पराः समानाः किन्तु तासाम् आचरणविधिः तु बहुत्र बहु भिन्नः अस्ति । ज्योतिषम् अपि एतासु परम्परासु अन्यतमा वर्तते । यद्यपि समग्रेऽपि चीनदेशे ज्योतिषव्यवहारः अस्ति अथवा न इति एतद् अत्र अधुना वक्तुम् अर्ह्यते किन्तु एतत् तु साहित्यावलोकनेन अवगम्यते यत् चीनदेशे यादृज्ज्योतिषस्य व्यवहारो वर्तते तत् जापानकोरियावियतनामादिषु देशेषु अपि बहुप्रचलितमस्ति । एतत् अवगन्तव्यं यत् इयं परम्परा भारतीयज्योतिषशास्त्रात् बहुधा भिन्ना अस्ति । भारतीयज्योतिषमिव चीनदेशीये ज्योतिषेऽपि द्वादश एव राशयः वर्तन्ते । पशु-नाम-आधारितम् एतद्देशीयं राशिचक्रं भारतस्य वैदिकज्योतिषमिव विमिश्रितं नास्ति । चीनजापानकोरियावियतनामदेशेषु 'वर्षम्' सम्बद्धराशिवर्षं भवति यच्च पशुवर्षमित्यभिधीयते । इयं मान्यता अस्ति यच्चीनदेशे द्विसहस्रवर्षपूर्वम् (२०००) वर्षस्य (पशुवर्षम् 'टेट' इति चीनदेशे वर्षसञ्ज्ञा) कस्मिंश्चित् खण्डे एतद्देशं सङ्कटात् त्रातुं भगवान् बुद्धः सर्वान् पशून् आजुहुवे किन्तु तद्दिने तत्र मूषकः वृषभः विचित्राङ्गः मार्जारी अजगरः सर्पः अश्वः अजः वानरः कुक्कुटः श्वानः वाराहश्चेति मात्रं द्वादश एव पशवः आजग्मुः । भगवान् बुद्धः समागमनक्रमेणैव एतान् पशून् वर्षाधिष्ठातॄन् अघोषयत् । एतानि पशुनामसम्बद्धानि वर्षाणि द्वादशानां वर्षाणाम् आवर्तनेन पुनः पुनः आवर्तन्ते । भारतीयज्योतिषशास्त्रे निर्दिष्टेषु नवविधकालमालेषु चन्द्रमानमिव एतद्देशस्य कालगणना चन्द्राधारिता अस्ति । अन्तरं मात्रं एतावदेव विद्यते यत् भारतीये ज्योतिषशास्त्रे चन्द्रः कञ्चिदेकं राशिं सार्धदिनद्वयम् अधिष्ठते किन्तु चीनदेशीयज्योतिषानुसारम् इयं गणना चान्द्रवर्षाधारिता अस्ति । तत्र कस्मिँश्चित् एकस्मिन् चान्द्रवर्षे १२ कृष्णपक्षाः भवन्ति तथा च १३ त्रयोदशः पक्षः द्वादशवर्षानन्तरम् अन्तर्निहितः भवति फलतः टेट इति वर्षस्य आरम्भः प्रतिवर्षं समानं न भवति ।

**राशीनां नामानि** - मूषकः (Rat / Tze) वृषभः (Ox / Chou) विचित्राङ्गः (Tiger / Yin) मार्जारी (Cat / Mao) अजगरः (Dragon / Chen), सर्पः (Snake / Si) अश्वः (Horse / Wu) अजः (Goat / Wei) वानरः (Monkey / Shen) कुक्कुटः (Rooster / You) श्वानः (Dog / Xu) वाराहः (Pig / Hai),




एतेषां राशिनाम्नां व्यवहारः कदा आरभ्य अभवत् इति सन्देहास्पदं वर्तते । चीनदेशीयज्योतिषस्य इतिहासानुसारम् (ssu Ma Chi'en 163 -85BCE इति ज्योतिर्विदः si chi इति इतिहासाभिलेखम् अलिखत् । अस्मिन् एतेषां राशिनाम्नाम् उल्लेखः नास्ति । पशुनामाधारितराशिचक्रस्य प्रादुर्भावात् पूर्वं चीनदेशीयाः ज्यौतिषिकाः द्वादशभिः भूरेखाभिः एकं वर्षम् आकलयन्ति स्म, याः मूलतः बृहस्पतिग्रहस्य एकं भगणं गणयितुमेव आसीत् । एतद्देशीयाः एतं भगणं महावर्षम् अथवा महायुगम् इति किमपि परिकल्पयन्ति । चीनदेशे वस्तुतः बृहस्पतिकालमानस्य गणना भारतीयज्योतिषोक्त बार्हस्पतमानतुल्यमेव वर्तते । भारतीयज्योतिषे बृहस्पतिः द्वादशभिः वर्षैः एकं राशिं क्रामते ।[1] एवमेव चीनदेशेऽपि द्वादशवर्षैः एकं राशिचक्रं परिपूर्णं भवति ततश्च पुनस्तस्य आवर्तनं जायते । अस्य महावर्षस्य कश्चन एकः मासः किमपि एकं वर्षं भवति । दशमे शताब्दे चीनदेशे पञ्चाङ्गस्य व्यवहारः अभवत् । एतानि पञ्चाङ्गानि तिब्बतदेशीयाः निर्वासिताः सन्न्यासिनः चीनदेशस्य उत्तरदक्षिणभागस्थेषु दुर्गमबौद्धमठेषु अलिखन् ।) चीनदेशे फलकथनस्य आधारः राशिः अस्ति ।

## राशीनां स्वभावः

### मूषकः (Rat)

मूषकराशौ उत्पन्नजातकः मनोहारी आकर्षकः (मोहक) उर्जवान् परामर्शकः गूढचिन्तकः सामजिकः विनोदी दृढनिश्चयी दृढगात्रवान् रसग्राही बुद्धिमान् सुन्दरः भावुकः उदारः निष्ठावान् उत्तेजितः द्युतक्रीडासक्तः सन्देही व्याकुलः श्रान्तशीलः ध्वसंकः शक्तिलुब्धकः च भवति ।

एतद्राशिसम्बद्धवर्षाणि – १९०० १९१२ १९२४ १९३६ १९४८ १९६० १९७२ १९८४ १९९६ २००८ २०२० २०३२

### वृषभः (Ox)

वृषराशौ उत्पन्नजातकः रोगी परिश्रमी पारिवारिकः व्यवस्थितः नेता गर्वी एकान्तसेवी यथार्थवादी आत्मविश्वासी सुवक्ता त्यागी मौनप्रियः दृढगात्रवान् पीडाव्याकुलः दीर्घावधिकरोगी च भवति । अनेन सह अलसः हठी क्रोधी अशिष्टः सत्ताप्रेमी पारम्परिकः

[1] बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः ॥ २ ॥ सूर्यसिद्धान्तः मानाध्यायः
नक्षत्रेण सहोदयमुगच्छन्ति येन देवपतिमन्त्री । तत्सञ्ज्ञं वक्तव्यं वर्षमासक्रमेणैव ॥
वर्षाणि कार्तिकादीन्याग्नेयाद् भद्वयानुयोगिनी । क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम् ॥ बृहत्संहिता, गुरुचाराध्यायः ।

प्रतिरोधकः निष्ठुरः ईर्ष्यालुः च इत्यपि भवति ।
एतद्राशिसम्बद्धवर्षाणि - १९०१ १९१३ १९२५ १९३७ १९४९ १९६१ १९७३ १९८५ १९९७ २००९ २०२१ २०३३

## सिंहः (Tiger)

सिंहराशौ उत्पन्नः जातकः उदारचित्तः अलङ्करणयुक्तः साहसिकः आश्वासितः नेता संरक्षकः प्रतिष्ठितः महान् सक्रियः आकर्षकः भाग्यशाली सुदृढः अधिकारी संवेदनशीलः उत्साही सम्मानितः च भवति । एतेन सह निरनुशासितः असम्मतः व्यर्थः त्वरणशीलः अवज्ञाकारी आतुरः उग्रः हठी कलहप्रेमी च इत्यपि भवति ।

एतद्राशिसम्बद्धवर्षाणि - १९०२ १९१४ १९२६ १९३८ १९५० १९६२ १९७४ १९८६ १९९८ २०१० २०२२ २०३४

## मार्जारी (Cat)

मार्जारीराशौ सञ्जातः जनः सुसंकृतः धार्मिकः सामाजिकः शिष्टः भावुकः अनुचरः चिन्तनशीलः महत्त्वकाङ्क्षी प्रतिभाशाली क्षमाशीलः विवेकी परम्परावादी सत्कारशीलः चतुरः च भवति । अनेन सह पण्डिताभिमानी संवदेनशीलः प्रच्छन्नशीलः कलाप्रेमी भीरुः पित्तोन्मादी

एतद्राशिसम्बद्धवर्षाणि - १९०३ १९१५ १९२७ १९३९ १९५१ १९६३ १९७५ १९८७ १९९९ २०११ २०२३ २०३५

## अजगरः (Dragon)

अजगरराशौ उत्पन्नः जातकः निष्ठावान् भावुकः (भावी) उत्साही सहजज्ञानयुक्तः चञ्चसमनः दृढः स्वस्थः प्रभावशाली महत्त्वधायी उदारः दानी साहसी मनोहरः कलात्मकः प्रसंशनीयः भाग्यशाली सफलः स्वायत्तः च भवति । अनेन सह चिन्तातुरः हठी इच्छाशक्तियुक्तः प्रश्नप्रष्टाः उच्चस्वरयुक्तः अन्यथा सांसारिकः अविवेकी मोहनः अनुमाता च भवति ।

एतद्राशिसम्बद्धवर्षाणि - १९०४ १९१६ १९२८ १९४० १९५२ १९६४ १९७६ १९८८ २००० २०१२ २०२४ २०३६

## सर्पः (Snake)

सर्पराशौ उत्पन्नजातकः बुद्धिमान् सहजप्रकृतिकः आकर्षकः मनोरञ्जकः भाग्यशाली सहानुभूतिपूर्णः शिष्टः मृदुभाषी उच्चवंशोत्पन्नः दयालुः दार्शनिकः शान्तः निर्णायकः च भवति । अनेन सह उदासीनः आडम्बरवान् कृपणः अतिशयव्ययशीलः अङ्कारी धृष्टः नियमनकर्ता तामसप्रकृतिकः आत्मघाती अलसः चञ्चलः च भवति ।

एतद्राशिसम्बद्धवर्षाणि - १९०५ १९१७ १९२९ १९४१ १९५३ १९६५ १९७७ १९८९ २००१ २०१३ २०२५ २०३७

## अश्वः (Horse)

अश्वराशौ उत्पन्नः जातकः सुशीलः सौम्यः सुवक्ता निपुणः स्वाधीनः प्रत्युत्पन्नमतिः पुष्टः मनोरञ्जकः आकर्षकः स्वतन्त्रः शक्तिमान् परिश्रमी विनोदी भावुकः स्पष्टवक्ता कामुकः च भवति । अनेन सह स्वार्थी क्षीणः उग्रः क्रूरः विद्रोही धृष्टः आडम्बरप्रियः उद्दण्डः अधीरः निःस्नेही हिंसकश्च इत्यपि भवति ।

एतद्राशिसम्बद्धवर्षाणि - १९०६ १९१८ १९३० १९४२ १९५४ १९६६ १९७८ १९९० २००२ २०१४ २०२६ २०३८

**अजः (Goat)**

अस्मिन् राशौ उत्पन्नजातकः शिष्टः सर्जनशीलः बुद्धिमान् अलङ्कृतः मृदुस्वभावी सरसयुक्तः अविष्कर्ता स्थूलः उद्योगी प्रियः समर्पितः कलानिष्णातः रसिकः नम्यः परोपकारी शान्तिप्रियः च भवति । एवमेव निराशावादी बहुचिन्तातुरः असन्तुष्टः चपलः हस्तक्षेपः अनुशासनरहितः पराधीनः अविश्वसनीयः यः समयं न पालयति तादृशः असुरक्षितः च इत्यपि भवति।

एतद्राशिसम्बद्धवर्षाणि - १९०७ १९१९ १९३१ १९४३ १९५५ १९६७ १९७९ १९९१ २००३ २०१५ २०२७ २०३९

**वानरः (Monkey)**

प्रज्ञावान् सरसः व्यावहारिकः समस्यापरिहर्ता आविष्कर्ता कुशलव्यवसायी विजेता उत्साही युवा चित्ताकर्षकः । अनेन सह छद्मरणनीतिज्ञः व्यर्थः गोप्ता अवसरवादी विश्वासरहितः किशोरः निर्लज्जः चेत्यपि भवति।

एतद्राशिसम्बद्धवर्षाणि - १९०८ १९२० १९३२ १९४४ १९५६ १९६८ १९८० १९९२ २००४ २०१६ २०२८ २०४०

**कुक्कुटः (Monkey)**

कुक्कुटराशौ उत्पन्नः जातकः स्पष्टवक्ता उत्साही विविधसाधनसम्पन्नः प्रफुल्लितः आकर्षकः प्रतिभावान् उदारः निष्ठावान् निष्कपटी संरक्षकः परिश्रमी सुरूपः मनोरञ्जकः मननशीलः ख्यातः साहसी स्वाश्वस्तः च भवति । अनेन प्रकारेण सः रूढिवादी आत्मश्लाघी अव्यवहारिकः संशयात्मा अल्पाहारी शिक्षाप्रदः गर्वी पण्डिताभिमानी अपव्ययी निर्लज्जश्च इत्यपि भवति।

एतद्राशिसम्बद्धवर्षाणि - १९०९ १९२१ १९३३ १९४५ १९५७ १९६९ १९८१ १९९३ २००५ २०१७ २०२९ २०४१

**शुनः (Dog)**

शुनराशौ उत्पन्नः जातकः उदारः उत्साही महान् निष्ठावान् समर्पितः सचेतः स्वार्थरहितः विश्वासी आडम्बरहीनः परोपकारी समृद्धः दार्शनिकः सम्मान्यः विचारवान् कर्त्तव्यपरायणः स्पष्टवक्ता बुद्धिमान् च भवति । एतेन सह सः व्यथितः संरक्षितः अन्तर्मुखी रक्षकः दुरापन्नः निराशापूर्णः अनिष्टकर्ता निन्दकः हठी उपदेशकः च इत्यपि भवति।

एतद्राशिसम्बद्धवर्षाणि - १९१० १९२२ १९३४ १९४६ १९५८ १९७० १९८२ १९९४ २००६ २०१८ २०३० २०४२

**वाराह (Pig)**


सूकरराशौ उत्पन्न जातकः शिष्टाचारयुक्तः निष्ठावान् कृपालुः सत्यनिष्ठः निष्पक्षः चतुरः सहृदयः सामाजिकः सुसंस्कृतः कामुकः निश्चयात्मकबुद्धिः शान्तिप्रियः स्नेहभाक् गम्भीरः भावुकः च भवति । एतेन सह सः अनुभवहीनः रक्षाहीनः असुरक्षितः तिरस्कृतः सांसारिकः सरलहृदयः च इत्यपि भवति।

वाराहराशिसम्बद्धवर्षाणि - १९११ १९२३ १९३५ १९४७ १९५९ १९७१ १९८३ १९९५ २००७ २०१९ २०३१ २०४३[2]

उपर्युल्लिखितं विवेचनम् इदं स्पष्टीकरोति यत् राशीनां स्वभावः कीदृशः अस्ति। येषां जातकानां जन्मवर्षम् – २०२२ इति अस्ति तस्य जातकस्य राशिः सिंहः भवति। एषः जातकः आश्वासितः नेता संरक्षकः प्रतिष्ठितः महान् सक्रियः आकर्षकः भाग्यशाली सुदृढः अधिकारी संवेदनशीलः उत्साही सम्मानितः च इत्येते गुणः सम्पन्नः भवतीति।

## Yang एवञ्च Yin इति द्विविधविभजनद्वारा राशीनां विभागः -

Yang एवञ्च Yin इति चीनदेशीयदर्शनस्य काचित् अतीव महत्त्वपूर्णा अवधारणा अस्ति यत् शुभाशुभस्य निर्णये साधिका इति मन्यते।



**Yang** (सकारात्मकम्, प्रकाशः, पुरुषसञ्ज्ञकः) – मूषकः, विचित्राङ्गः, अजगरः, अश्वः, वानरः, श्वानः

**Yin** (नकारात्मकम्, तमः, स्त्रीसञ्ज्ञकम्) – वृषभः, मार्जारी, सर्पः, अजः, कुक्कुटः, वाराहः

पूर्वमेव उक्तं यत् चीनदेशीये ज्योतिषे राश्यनुगुणं फलादेशः क्रियते। अस्य इदं तात्पर्यं कदापि नास्ति यत् चीनदेशे ग्रहाणाम् अवधारणा नास्ति। तत्र भारतीयज्योतिषमिव ग्रहाः शुभाशुभफलप्रदाः इति रूपेण न सन्ति किन्तु तत्त्वैः साकं तत्सङ्ख्याकानां ग्रहाणाम् अवलम्बनमस्ति एव। चीनदेशीयज्योतिषे पाश्चात्यज्योतिषम् अथ च इतिहासानुगुणं शताब्दीमानम् (६०) षष्टिवर्षात्मकं भवति यदग्रे १२ वर्षात्मकमानेन विभक्तं भवति। अतः यथा अधुना पाश्चात्यकालगणनानुसारम् (२१) एकविंशी शताब्दी प्रवर्तमाना वर्तते। तद्वदेव चीनदेशीयकालगणनानुसारम् (७८) अष्टसप्ततितमी शताब्दी (षष्ट्यब्दी) (०२-०२-१९८४ इत्यास्मात् आरभ्य २०४४ वर्षपर्यन्तम्) प्रवर्तमाना वर्तते। कृष्णपक्षस्य प्रतिपदः चीनदेशस्य मासस्य आरम्भः जायते।

## पञ्च मौलिकतत्त्वानि –

चीनदेशीये ज्योतिषे पञ्चतत्त्वानि प्रमुखभागजातानि सन्ति तानि च यथाक्रमं काष्ठाग्निभूधातुजलाख्यानीति। चीनदेशीये साहित्ये एतानि जीवनार्थम् अनिवार्याणि मन्यन्ते।



एतानि तत्त्वानि विशेषतः कैश्चिद् ग्रहैः सम्बद्धानि सन्ति यथा बुधः (काष्ठम्, वसन्तः, घ्राणेन्द्रियम्) बृहस्पतिः (अग्निः, ग्रीष्मः, त्वगिन्द्रयम्) भौमः (पृथ्वी, ग्रीष्मः, रसेन्द्रियम्) शनिः (धातुः, शरद्, श्रवणेन्द्रियम्) तथा च शुक्रः (जलम्, शिशिरः, चक्षुरिन्द्रियम्) इति।

एतेषां पञ्चानां तत्त्वानां सम्बद्धः चीनदेशस्य औषधविज्ञानेन अथ च मर्मभेदनचिकित्साकर्मणा (Acupuncture) साकम् अपि अस्ति यथा काष्ठम् – यकृत्, अग्निः – हृदयम्, भूः – प्लीह अथ च अग्नाश्यः, धातुः – श्वासकोषः, जलम् – वृक्क

2 Chinese Astrology by Suzane white

एतेषां पञ्चानां तत्त्वानाम् आधारेणैव **षष्टिवर्षात्मकं शताब्दीचक्रं** भवति । चन्द्रः चीनज्योतिषे महत्त्वपूर्णां भूमिकां वहति । अयं चान्द्रमासः भारतीयज्योतिषशशास्त्रे निर्दिष्टचान्द्रमासस्य अपेक्षया किञ्चिद्भिन्नं वर्तते । तत्र मासः चतुर्षु सप्ताहेषु विभक्तो वर्तते प्रथमसप्ताहः द्वितीयः सप्ताहः पूर्णिमायाः एकदिनपूर्वं यावत् तृतीयसप्ताहः पूर्णिमायाः आरभते अन्तिमसप्ताहः द्वाविंशाद्दिनात् आरभ्य एकोनत्रिंशं दिनं यावद्भवति । चीनज्योतिर्विदाम् अवधारणा अस्ति यत् एतेषां चतुर्णाम् अपि सप्ताहानां कश्चन विशिष्टः प्रभावः भवति ।

(१) प्रथमसप्ताहस्य (शुक्लपक्षस्य प्रतिपदः सप्तमीं तिथिं यावत्) तत्त्वं काष्ठं प्रभावयुक्तराशयः विचित्राङ्गः मार्जारी अजगरश्चेति अथ च दिशा प्राची भवति ।

(२) द्वितीयसप्ताहः (शुक्लपक्षस्य अष्टमीतिथेः चतुर्दशीं यावत्) तत्त्वम् अग्निः, प्रभावयुक्तराशयः सर्पः अश्वः अजश्चेति अथ च दिशा दक्षिणा भवति ।

(३) तृतीयसप्ताहः (पूर्णिमायाः कृष्णपक्षस्य षष्ठीं यावत्) तत्त्वं धातुः प्रभावयुक्तराशयः वानरः कुक्कुटः श्वानश्चेति अथ च दिशा प्रतीची भवति ।

(४) चतुर्थसप्ताहः (सप्तमीतिथेः त्रयोदशीं यावत्) तत्त्वं जलं प्रभावयुक्तराशयः मूषकः वृषभः वाराहश्चेति अथ च दिशा उदीची भवति ।

इदानीं राशीनां मासदिनाङ्कानुसारं विवरणं पश्यामः

**मूषकः** - फेब्रुवरीमासस्य ४ दिनाङ्कात् मार्चमासस्य ५ दिनाङ्कं यावत् । ११पी.एम. – १ ए.एम., सङ्क्रमणकालः मध्यरात्रिः

**वृषभः** - मार्चमासस्य ६ दिनाङ्कात् अप्रैलमासस्य ४ दिनाङ्कं यावत् । १ ए. एम. – ३ ए.एम., सङ्क्रमणकालः मध्यरात्र्युत्तरम्

**विचित्राङ्गः** - अप्रैलमासस्य ५ दिनाङ्कात् मईमासस्य ५ दिनाङ्कं यावत् । ३ ए.एम. – ५ ए.एम., सङ्क्रमणकालः सन्ध्याकालः

**मार्जारी** - मईमासस्य ६ दिनाङ्कात् जूनमासस्य ५ दिनाङ्कं यावत् । ५ ए.एम. – ७ ए.एम.,सङ्क्रमणकालः सूर्योदयकालः

**अजगरः** - जूनमासस्य ६ दिनाङ्कात् जुलाईमासस्य ६ दिनाङ्कं यावत् । ७ ए.एम. - ९ ए.एम., सङ्क्रमणकालः प्रातः भोजनकालः

**सर्पः** - जुलाईमासस्य ७ दिनाङ्कात् अगस्तमासस्य ७ दिनाङ्कं यावत् । ९ ए.एम. – ११ ए.एम., मध्याह्नकालात् पूर्वम्

**अश्वः** - अगस्तमासस्य ८ दिनाङ्कात् सितम्बरमासस्य ७ दिनाङ्कं यावत्। ११ ए.एम. – १ पी.एम., मध्याह्नः

**अजः** - सेप्टम्बरमासस्य ८ दिनाङ्कात् अक्टोबरमासस्य ७ दिनाङ्कं यावत्। १ पी.एम. – ३ पी.एम., पूर्वमध्याह्नोत्तरम्

**वानरः** - अक्टोबरमासस्य ८ दिनाङ्कात् नवेम्बरमासस्य ७ दिनाङ्कं यावत्। ३ पी.एम. – ५ पी.एम., परमध्याह्नोत्तरम्

**कुक्कुटः** - नवेम्बरमासस्य ८ दिनाङ्कात् डिसेम्बरमासस्य ६ दिनाङ्कं यावत्। ५ पी.एम. – ७ पी.एम. सूर्यास्तम्

**श्वानः** - डिसेम्बरमासस्य ७ दिनाङ्कात् जनवुअरीमास्य ५ दिनाङ्कं यावत्। ७ पी.एम. – ९ पी.एम. सायङ्कालः

**वाराहः** - जनवुअरीमास्य ६ दिनाङ्कात् फैब्रुवरीमासस्य ३ दिनाङ्कं यावत्। ९ पी.एम. – ११ पी.एम., रात्रिकालः[3]

## चीनभारतदेशयोः ज्योतिषम्

| | भारतीयं ज्योतिषम् | चीनदेशीयं ज्योतिषम् |
|---|---|---|
| १. | भारतीयं ज्योतिषं वैदिकज्योतिषम् अपि कथ्यते। | चीनदेशीयम् इति नाम्ना एव व्यवह्रियते। |
| २. | सिद्धान्तसंहिताहोरेति इत्येवम् उत्तरोत्तरक्रमेण ज्योतिषस्य विभागाः सन्ति। | सिद्धान्तसंहिताहोरासदृशः विभागः नास्ति। ज्योतिषनाम्ना फलितस्य एव व्यवहारः अस्ति। |
| ३. | षष्टिवर्षात्मकं संवत्सरचक्रम् अस्ति। | द्वादशवर्षात्मकं संवत्सरचक्रम् अस्ति। |
| ४. | पशुमानवमिश्रितं राशिचक्रम् अस्ति। | पशुनाम्नाम् आधारितं राशिचक्रम् अस्ति। |
| ५. | द्वादश राशयः सन्ति। | द्वादश राशयः सन्ति। |
| ६. | नवविधकालमानस्य सङ्कल्पना अस्ति। | चान्द्रमानं गणनायाः आधारः अस्ति। |
| ७. | द्वौ प्रकाशग्रहौ पञ्च ताराग्रहाः द्वौ छायाग्रहौः इति आहत्य नवानां ग्रहाणां विवेचनम् अस्ति। | ग्रहाः राशीनां स्वामिनः न, अपितु पञ्चतत्त्वानां स्वामिनः सन्ति। |
| ८. | अग्निः वायुः जलं पृथ्वी आकाशः इत्येतानि पञ्च तत्त्वानि सन्ति। | काष्ठम्, अग्निः, भूः, धातुः एवञ्च जलम् इत्येते पञ्च तत्त्वानि सन्ति। |
| ९. | शतवर्षात्मिकी शताब्दी अस्ति। | षष्टिवर्षात्मिकी शताब्दी अस्ति। |
| १०. | अभिजित् सहितानि अष्टाविंशतिः नक्षत्राणि सन्ति। | सप्तविंशतिः एव नक्षत्राणि सन्ति। |
| ११. | सामान्यतः वर्षे शुक्लकृष्णौ इति रूपेण आहत्य २४ चान्द्रपक्षाः भवन्ति। | वर्षे १२ कृष्णपक्षाः भवन्ति, किन्तु त्रयोदशः पक्षस्तु द्वादशानां वर्षाणाम् अनन्तरं योज्यते। |

[3] Chinese astrology History meaning and forecasting by Costantino, Maria - 2007

| | | |
|---|---|---|
| १२. | सूर्यः चन्द्रः नक्षत्रप्रमुखाः कालगणनायाः आधाराः सन्ति। | मात्रं चन्द्रमाः एव कालगणयाः आधारः अङ्गीक्रियते। |
| १३. | जन्मकुण्डली प्रश्नकुण्डली वर्षकुण्डली चेति जन्मपत्रभेदाः सन्ति। | जन्मकुण्डली प्रश्नकुण्डली वर्षकुण्डली चेति जन्मपत्रभेदाः न सन्ति। |
| १४. | षोडशानां वर्गाणां सङ्कल्पना अस्ति। | वर्गसङ्कल्पना नास्ति। |
| १५. | जन्मपत्रादिकम् एव फलकथनस्य मुख्यं घटकं भवति। | जन्मपत्रादिकं न भवति किन्तु फलकथनं जातकस्य वर्षानुसारं क्रियते। |

**निष्कर्षः**

यदा चीनदेशस्य ज्योतिषसाहित्यम् अवलोकयामश्चेत् तदा अवज्ञायते यत् चीनदेशे यद्यपि ज्योतिषपरम्परा प्राचीना अस्ति किन्तु अस्यां भारतीयज्योतिषस्य अपि प्रभावः अस्त्येव यथा - कानिचन राशिनामानि भारतीयज्योतिषस्य राशिनामसदृशानि एव सन्ति (अजः वृषभः सिंहः चेति), चान्द्रगणना प्रायः भारतीयचान्द्रमानम् एव अनुसरति एवञ्च धार्मिककृत्येषु ज्योतिषस्य अवलम्बनं भारतमिव अस्ति। यद्यपि इदम् अपि सत्यम् अस्ति यत् यथा भारतदेशे ज्योतिषस्य प्रसारः प्रचारः प्रसिद्धिः प्रयोगश्च अस्ति तथा चीनदेशे नास्ति । किन्तु इदम् अपि असत्यं नास्ति यत् वर्तमानसमये चीनदेशीयस्य ज्योतिषस्य अपि लोकप्रियता बहु अस्ति । यदि भारतीयज्योतिषदृशा एतत् विचारयामश्चेत् भारतीयज्योतिषपरम्परा अतीव समृद्धा प्रतीयते। इदम् अकाट्यम् अस्ति भारतसहितं विश्वे यथा ज्योतिषशास्त्रसम्बद्धाः गवेषणा अभवन् अथवा जायमानाः सन्ति तथैव चीनदेशे अपि अस्ति। इयं परम्परां चीनदेशीयान् भारतीयैः सह शास्त्रसहभावं जनयति। द्वयोरपि देशयोः एतच्छास्त्रसम्बद्धं साहित्यस्य भूयो भूयो अवलोकनेन इतोऽपि शास्त्रस्य उपकारः संवृद्धिश्च भवतीति मे द्रढियान् विश्वासः।